# AnandabhairavoktaM shrIreNukAhRidayam

# આનન્દભૈરવોક્તં શ્રીરેણુકાહૃદયમ્

## Document Information

Text title : reNukAhridayam Anandabhairavokta

File name : reNukAhridayam.itx

Category : hRidaya, devii, reNukA, devI

Location : doc_devii

Transliterated by : DPD

Proofread by : DPD

Latest update : June 16, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2021

*sanskritdocuments.org*

# આનન્દભૈરવોક્તં શ્રીરેણુકાહૃદયમ્

॥ શ્રી ગણેશાય નમઃ । શ્રી રેણુકાયૈ નમઃ ॥

સ્કન્દ ઉવાચ –
ભગવન્ દેવદેવેશ પરમેશ શિવાપતે ।
રેણુકાહૃદયં ગુહ્યં કથયસ્વ પ્રસાદતઃ ॥ ૧॥

શિવ ઉવાચ –
શ‍ૃણુ ષણ્મુખ વક્ષ્યામિ રેણુકહૃદયં પરમ્।
જપેદ્યો હૃદયં નિત્યં તસ્ય સિદ્ધિઃ પદે પદે ॥ ૨॥

રેણુકાહૃદયસ્યાસ્ય ઋષિરાનન્દભૈરવઃ।
છન્દોભૃદ્વિરાટ્ પ્રોક્તં દેવતા રેણુકા પરા ॥ ૩॥

ક્લીં બીજં કામદા શક્તિર્મહામાયેતિ કીલકમ્ ।
સર્વાભીષ્ટ ફલપ્રાપ્ત્યૈ વિનિયોગ ઉદાહૃતઃ ॥૪॥

ૐ ક્લીમિત્યઙ્ગુષ્ઠાદિ હૃદયાદિન્યાસં કૃત્વા ધ્યાતેન્નિત્યમિતિ ધ્યાત્વા
હૃદયં પઠેત્ ।

॥ અથ ધ્યાનમ્ ॥

ધ્યાયેન્નિત્યમપૂર્વવેશલલિતાં કન્દર્પલાવણ્યદાં
દેવીં દેવગણૈરુપાસ્યચરણાં કારુણ્યરત્નાકરામ્ ।
લીલાવિગ્રહણીં વિરાજિતભુજાં સચ્ચન્દ્રહાસદિભિ-
ર્ભક્તાનન્દવિધાયિનીં પ્રમુદિતાં નિત્યોત્સવાં રેણુકામ્ ॥

આનન્દભૈરવ ઉવાચ –
ૐ નમો રેણુકાયૈ સર્વભૂતિદાયૈ સર્વકર્ત્ર્યૈ સર્વહર્ત્ર્યૈ સર્વપાલિન્યૈ
સર્વર્થદાત્ર્યૈ સચ્ચિદાનન્દરૂપિણ્યૈ એકલાયૈ કામાક્ષ્યૈ કામદાયિન્યૈ
ભર્ગાયૈ ભર્ગરૂપિણ્યૈ ભગવત્યૈ સર્વેશ્વર્યૈ એકવીરાયૈ વીરવન્દિતાયૈ
વીરશક્ત્યૈ વીરમોહિન્યૈ વીરસુવેશ્યૈ હ્રીંકારાયૈ ક્લીંકારાયૈ વાગ્ભવાયૈ

ઐંકારાયૈ ૐકારાયૈ શ્રીંકારાયૈ દશાર્ણાયૈ દ્વાદશર્ણાયૈ ષોડશાર્ણાયૈ ત્રિબીજકાયૈ
ત્રિપુરાયૈ ત્રિપુરહરવલ્લભાયૈ કાત્યાયિન્યૈ યોગિનીગણસેવિતાયૈ ચામુણ્ડાયૈ
મુણ્ડમાલિન્યૈ ભૈરવસેવિતાયૈ ભીતિહરાયૈ ભવહારિણ્યૈ કલ્યાણ્યૈ
કલ્યાણદાયૈ નમસ્તે નમસ્તે ॥ ૫॥

નમો નમઃ કામુકામદાયૈ નમો નમો ભક્તદયાઘનાયૈ ।
નમો નમઃ કેવલકેવલાયૈ નમો નમો મોહિની મોહદાયૈ ॥૬॥
નમો નમઃ કારણકારણાયૈ  નમો નમઃ શાન્તિરસાન્વિતાયૈ ॥
નમો નમઃ મઙ્ગલમઙ્લાયૈ નમો નમો મઙ્ગલભૂતિદાયૈ ॥ ૭॥
નમો નમઃ સદ્ગુણવૈભવાયૈ  વિશુદ્ધવિજ્ઞાનસુખપ્રદાયૈ ।
નમો નમઃ શોભનશોભિતાયૈ નમો નમઃ શક્તિસમાવૃતાયૈ ॥ ૮॥
નમઃ શિવાયૈ શાન્તાયૈ નમો મઙ્ગલમૂર્તયે ।
સર્વસિદ્ધિપ્રદાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૯॥

લલિતાયૈ નમસ્તુભ્યં પદ્માવત્યૈ નમો નમઃ ॥

હિમાચલસુતાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૦॥

વિષ્ણુવક્ષઃસ્થલાવાસે શિવવામાઙ્કસંસ્થિતે ।
બ્રહ્માણ્યૈ બ્રહ્મમાત્રે તે રેણુકાયૈ નમોઽસ્તુ  તે ॥ ૧૧॥

રામમાત્રે નમસ્તુભ્યં જગદાનન્દકારિણી ।
જમદગ્નિપ્રિયાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૨॥

નમો ભૈરવરૂપાયૈ ભીતિહન્ત્ર્યૈ નમો નમઃ ।
નમઃ પરશુરામસ્ય જનન્યૈ તે નમો નમઃ ॥ ૧૩॥

કમલાયૈ નમસ્તુભ્યં તુલજાયૈ નમો નમઃ ।
ષડ્ચક્રદેવતાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૪॥

અહલ્યાયૈ નમસ્તુભ્યં કાવેર્યૈ નમો નમઃ ।
સર્વાર્થિપૂજનીયાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૫॥

નર્મદાયૈ નમસ્તુભ્યં મન્દોદર્યૈ નમો નમઃ ।
આદ્રિસંસ્થાનાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૬॥

ત્વરિતાયૈ નમસ્તુભ્યં મન્દાકિન્યૈ નમો નમઃ ॥

સર્વમન્ત્રાધિદેવતાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૭॥

વિશોકાયૈ નમસ્તુભ્યં કાલશક્ત્યૈ નમો નમઃ ।
મધુપાનોદ્ધતાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૧૮॥

તોતુલાયૈ નમસ્તુભ્યં નારાયણ્યૈ નમો નમઃ ।
પ્રધાનાગુહરૂપિણ્યૈ  રેણુકાયૈ નમો નમઃ ॥ ૧૯॥

સિંહગાયૈ નમસ્તુભ્યં કૃપાસિદ્ધ્યૈ નમો નમઃ ।
દારિદ્ર્યવનદાહિન્યૈ રેણુકાયૈ નમો નમઃ ॥ ૨૦॥

સ્તન્યદાયૈ નમસ્તુભ્યં વિનાશઘ્ન્યૈ નમો નમઃ ।
મધુકૈટકભહન્ત્ર્યૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૧॥

ત્રિપુરાયૈ નમસ્તુભ્યં પુણ્યકીર્ત્યૈ નમો નમઃ ।
મહિષાસુરવિનાશાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૨॥

ચેતનાયૈ નમસ્તુભ્યં વીરલક્ષ્મ્યૈ નમો નમઃ ।
કૈલાશનિલયાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૩॥

બગલાયૈ નમસ્તુભ્યં બ્રહ્મશક્ત્યૈ નમો નમઃ ।
કર્મફલપ્રદાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૪॥

શીતલાયૈ નમસ્તુભ્યં ભદ્રકાલ્યૈ નમો નમઃ ।
શુમ્ભદર્પહરાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૫॥

એલામ્બાયૈ નમસ્તુભ્યં મહાદેવ્યૈ નમો નમઃ ।
પીતામ્બરપ્રભાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૬॥

નમઃ ત્રિગાયૈ રુક્માયૈ નમો તે ધર્મશક્તયે ।
અજ્ઞાનકલ્પિતાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૨૭॥

કપર્દાયૈ નમસ્તુભ્યં કૃપાશક્ત્યૈ નમો નમઃ ।
વાનપ્રસ્થાશ્રમસ્થાયૈ રેણુકાયૈ નમો નમઃ ॥ ૨૮॥

વિજયાયૈ નમસ્તુભ્યં જ્વાલામુખ્યૈ નમો નમઃ ।
મહાસ્મૃતિર્જ્યોત્સ્નાયૈ રેણુકાયૈ નમો નમઃ ॥ ૨૯॥

નમઃ તૃષ્ણાયૈ ધૂમ્રાયૈ નમોતે ધર્મસિદ્ધયે ।
અર્ધમાત્રાક્ષરાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૩૦॥

નમઃ શ્રદ્ધાયૈ વાર્તાયૈ નમો મેધશક્ત્યે ।
મન્ત્રાધિદેવતાયૈ તે રેણુકાયૈ નમો નમઃ ॥ ૩૧॥

જયદાયૈ નમસ્તુભ્યં શૂલેશ્વર્યૈ નમો નમઃ ।
અલકાપુરસંસ્થાનાયૈ રેણુકાયૈ નમો નમઃ ॥ ૩૨॥

નમઃ પરાયૈ ધ્રૌવ્યાયૈ નમઃ તે શેષશક્ત્યે ।
ધ્રુવમયી હૃદ્રૂપાયૈ રેણુકાયૈ નમો નમઃ ॥ ૩૩॥

નમો નમઃ શક્તિસમન્વિતાયૈ નમો નમઃ તુષ્ટિવરપ્રદાયૈ ।
નમો નમઃ મણ્ડનમણ્ડિતાયૈ નમો નમો મઞ્જુલમોક્ષદાયૈ ॥ ૩૪॥

શ્રીશિવ ઉવાચ –
ઇત્યેવં કથિતં દિવ્યં રેણુકાહૃદયં પરમ્।
યઃ પઠેત્સતતં વિદ્વાન્ તસ્ય સિદ્ધિઃ પદે પદે॥ ૩૫॥

રાજદ્વારે શ્મશાને ચ સંકટે દુરતિક્રમે।
સ્મરણાદ્ધૃદયસ્યાસ્ય સર્વસિદ્ધિઃ પ્રજાયતે ॥ ૩૬॥

દુર્લભં ત્રિષુ લોકેષુ તસ્ય પ્રાપ્તિર્ભવેદ્ધ્રુવમ્ ।
વિત્તાર્થી વિત્તમાપ્નોતિ સર્વાર્થી સર્વમાપ્નુયાત્ ॥ ૩૭॥

॥ ઇત્યાગમસારે શિવષણ્મુખસંવાદે આનન્દભૈરવોક્તં
રેણુકાહૃદયં સમ્પૂર્ણમ્ ॥

॥ ૐ ક્લીં બીજાત્મિકાર્પણમસ્તુ ॥

Encoded and proofread by DPD

*AnandabhairavoktaM shrIreNukAhRidayam*
pdf was typeset on June 16, 2021

Please send corrections to *sanskrit@cheerful.com*